# শ্রীশারদা গীতম্

{॥ শ্রীশারদা গীতম্ ॥}

কল্যাণানি তনোতু কাঽপি তরুণী শৃঙ্গাদ্রিভূষাযিতা

শ্রীমচ্ছঙ্করদেশিকেন্দ্রকলিতং চক্রং সদাধিষ্ঠিতা ।

দূরস্থামপি পাদনম্রজনতাং বিদ্যাযুরারোগ্য সত্

সন্তত্যাদিমনোরথাপ্তিসহিতাং সন্তন্বতী সত্বরম্ ॥

শারদাম্ব শরদিন্দুনিভানন ভাসিত নিখিল দিগন্তে ।

পারদে ভবমহাজলরাশেঃ পাবযমাং বিধিকান্তে ॥

দন্তকান্তিজিত কুন্দসুমে বরকুন্তল নির্ধুতভৃঙ্গে ।

শান্তচিত্তজন সন্তত চিন্তিত কোটিচন্দ্রসদৃশাঙ্গে ॥

পাদনম্রজন বাঞ্ছিতপূরণ নির্জিত নন্দনবল্লিকে ।

মাদনেষ্বসন গর্ব নিবর্হণ দক্ষ মনোহর চিল্লিকে ॥

ঋষ্যশৃঙ্গপুর বাসবিলোলে বশ্যযন্ত্র সদৃশাস্যে ।

পশ্বদঙ্ঘ্রি শুকদেবহূতিসুত কশ্যপাদি সমুপাস্যে ॥ ॐ ॥

॥ ইতি দক্ষিণাম্নায শৃঙ্গেরী শ্রীশারদাপীঠাধিপতি

শঙ্করাচার্য জগদ্গুরুবর্যো শ্রী চন্দ্রশেখর ভারতী

মহাস্বামিভিঃ বিরচিতম্ শ্রী শারদা গীতম্ সম্পূর্ণম্ ॥

Encoded by R. Harshananda

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sharada Geetham Lyrics in Bengali PDF
% File name : shAradAgItam.itx
% Category : gItam
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : R. Harshananda harshanand_16 at rediffmail.com
% Latest update : April 17, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ November 12, 2015 ] at Stotram Website